# Shri Kamakshi Stotram 2

# શ્રીકામાક્ષીસ્તોત્રમ્ ૨

## Document Information

Text title : shrIkAmAkShIstotram 2

File name : kAmAkShIstotram2.itx

Category : devii, kAmAkShI, stotra, devI

Location : doc_devii

Transliterated by : P. R. Ramamurthy

Proofread by : P. R. Ramamurthy

Latest update : April 24, 2015

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીકામાક્ષીસ્તોત્રમ્ ૨

કામારિકામાં કમલાસનસ્થાં
    કામ્યપ્રદાં કઙ્કણચૂડહસ્તાં ।
કાઞ્ચીનિવાસાં કનકપ્રભાસાં
    કામાક્ષિદેવીં કલયામિ ચિત્તે ॥

કાઞ્ચીનૂપુરરત્નકઙ્કણલસત્કેયૂરહારોજ્જ્વલાં
    કાશ્મીરારુણકઞ્ચુકાઞ્ચિતકુચાં કસ્તૂરિકાચર્ચિતામ્ ।
કલ્હારાઞ્ચિતકલ્પકોજ્જ્વલમુખીં કારુણ્યકલ્લોલિનીં
    કામાક્ષીં કલયામિ કલ્પલતિકાં કાઞ્ચીપુરીદેવતામ્ ॥ ૧॥

કામારાતિમનઃપ્રિયાં કમલભૂસેવ્યાં રમારાધિતાં
    કન્દર્પાધિકદર્પદાનવિલસત્સૌન્દર્યદીપાઙ્કુરામ્ ।
કીરાલાપવિનોદિનીં ભગવતીં કામ્યપ્રદાનવ્રતાં
    કામાક્ષીં કલયામિ કલ્પલતિકાં કાઞ્ચીપુરીદેવતામ્ ॥ ૨॥

કાદમ્બપ્રમદાં વિલાસગમનાં કલ્યાણકાઞ્ચીરવાં
    કલ્યાણાચલપાદપદ્મયુગલાં કાન્ત્યા સ્ફુરન્તીં શુભામ્ ।
કલ્યાણાચલકાર્મુકપ્રિયતમાં કાદમ્બમાલાશ્રિયં
    કામાક્ષીં કલયામિ કલ્પલતિકાં કાઞ્ચીપુરીદેવતામ્ ॥ ૩॥

ગન્ધર્વામરસિદ્ધચારણવધૂધ્યેયાં પતાકાઞ્ચિતાં
    ગૌરીં કુઙ્કુમપઙ્કપઙ્કિતકુચદ્વન્દ્વાભિરામાં શુભામ્ ।
ગમ્ભીરસ્મિતવિભ્રમાઙ્કિતમુખીં ગઙ્ગાધરાલિઙ્ગિતાં
    કામાક્ષીં કલયામિ કલ્પલતિકાં કાઞ્ચીપુરીદેવતામ્ ॥ ૪॥

વિષ્ણુબ્રહ્મમુખામરેન્દ્રવિલસત્કોટીરપીઠસ્થલાં
    લાક્ષારઞ્જિતપાદપદ્મયુગલાં રાકેન્દુબિમ્બાનનામ્ ।
વેદાન્તાગમવેદ્યચિન્ત્યચરિતાં વિદ્વજ્જનૈરાવૃતાં
    કામાક્ષીં કલયામિ કલ્પલતિકાં કાઞ્ચીપુરીદેવતામ્ ॥ ૫॥

માકન્દદ્રુમમૂલદેશમહિતે માણિક્યસિંહાસને
 દિવ્યાં દીપિતહેમકાન્તિનિવહાં વસ્ત્રાવૃતાં તાં શુભામ્ ।
દિવ્યાકલ્પિતદિવ્યદેહભરિતાં દૃષ્ટિપ્રમોદાર્પિતાં
 કામાક્ષીં કલયામિ કલ્પલતિકાં કાઞ્ચીપુરીદેવતામ્ ॥ ૬॥

આધારાદિસમસ્તચક્રનિલયામાદ્યન્તશૂન્યામુમાં
 આકાશાદિસમસ્તભૂતનિવહાકારામશેષાત્મિકામ્ ।
યોગીન્દ્રૈરપિ યોગિનીશતગણૈરારાધિતામમ્બિકાં
 કામાક્ષીં કલયામિ કલ્પલતિકાં કાઞ્ચીપુરીદેવતામ્ ॥ ૭॥

હ્રીઙ્કારપ્રણવાત્મિકાં પ્રણમતાં શ્રીવિદ્યવિદ્યામયીં
 ઐં ક્લીં સૌં રુચિ મન્ત્રમૂર્તિનિવહાકારામશેષાત્મિકામ્ ।
બ્રહ્માનન્દરસાનુભૂતિમહિતાં બ્રહ્મપ્રિયંવાદિનીં
 કામાક્ષીં કલયામિ કલ્પલતિકાં કાઞ્ચીપુરીદેવતામ્ ॥ ૮॥

સિદ્ધાનન્દજનસ્ય ચિન્મયસુખાકારાં મહાયોગિનીં
 માયાવિશ્વવિમોહિનીં મધુમતીં ધ્યાયેત્ શુભાં બ્રાહ્મણીમ્ ।
ધ્યેયાં કિન્નરસિદ્ધચારણવધૂ ધ્યેયાં સદા યોગિભિઃ
 કામાક્ષીં કલયામિ કલ્પલતિકાં કાઞ્ચીપુરીદેવતામ્ ॥ ૯॥

કામારિકામાં કમલાસનસ્થાં
 કામ્યપ્રદાં કઙ્કણચૂડહસ્તાં ।
કાઞ્ચીનિવાસાં કનકપ્રભાસાં
 કામાક્ષિદેવીં કલયામિ ચિત્તે ॥ ૧૦॥

ઇતિ શ્રી કામાક્ષીસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by P. R. Ramamurthy

*Shri Kamakshi Stotram 2*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*